# Kamala Ashtakam

# કમલાષ્ટકમ્

## Document Information

Text title : Kamala Ashtakam

File name : kamalAShTakam.itx

Category : devii, aShTaka, dashamahAvidyA, lakShmI

Location : doc_devii

Proofread by : Rajesh Thyagarajan

Description/comments : From Stotrasamuchchaya 2, Edited by Pandit K. Parameshwara Aithal

Latest update : May 10, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 11, 2023

*sanskritdocuments.org*

# કમલાષ્ટકમ્

ન્યઙ્કાવરાતિભયશઙ્કાકુલે ધૃતદૃગઙ્કાયતિઃ પ્રણમતાં
શઙ્કાકલઙ્કયુતપઙ્કાયતાશ્મશિતટઙ્કાયિતસ્વચરિતા ।
ત્વં કાલદેશપદશઙ્કાતિપાતિપતિસઙ્કાશ વૈભવયુતા
શં કામમાતરનિશં કામનીયમિહ સઙ્કાશયાશુ કૃપયા ॥ ૧॥

આચાન્તરઙ્ગદલિમોચાન્તરઙ્ગરુચિવાચાં તરઙ્ગગતિભિઃ
કાચાટનાય કટુવાચાટભાવયુતનીચાટનં ન કલયે ।
વાચામગોચરસદાચારસૂરિજનતાચાતુરીવિવૃતયે
પ્રાચાં ગતિં કુશલવાચાં જગજ્જનનિ યાચામિ દેવિ ભવતીમ્ ॥ ૨॥

ચેટીકૃતામરવધૂટીકરાગ્રધૃતપેટીપુટાર્ઘ્યસુમનો-
વીટીદલક્રમુકપાટીરપઙ્કનવશાટીકૃતાઙ્ગરચના ।
ખેટીકમાનશતકોટીકરાબ્જજજટાટીરવન્દિતપદા
યા ટીકતેઽબ્જવનમાટીકતાં હૃદયવાટીમતીવ કમલા ॥ ૩॥

સ્વાન્તાન્તરાલકૃતકાન્તાગમાન્તશતશાન્તાન્તરાઘનિકરાઃ
શાન્તાર્થકાન્તવકૃતાન્તા ભજન્તિ હૃદિ દાન્તા દુરન્તતપસા ।
યાં તાનતાપભવતાન્તાતિભીતજગતાં તાપનોદનપટું
માં તારયત્વશુભકાન્તારતોઽદ્ય હરિકાન્તાકટાક્ષલહરી ॥ ૪॥

યાં ભાવુકા મનસિ સમ્ભાવયન્તિ ભવસમ્ભાવનાપહૃતયે
ત્વં ભાસિ લક્ષ્મિ સતતં ભાવ્યયદ્ભવનસમ્ભાવનાદિવિધયે ।
જમ્ભારિસમ્પદુપલમ્ભાદિકારણમહં ભાવ્યમઙ્ઘ્રિયુગલં
સમ્ભાવયે શ્રુતિષુ સમ્ભાષિતં વચસિ સમ્ભાષ્ય તસ્ય તવ ચ ॥ ૫॥

દૂરાવધૂતમધુધારાગિરોઽચ્યકુચભારાનતાઙ્ગલતિકા-
સારાઙ્ગલિપ્તઘનસારાર્દ્રકુઙ્કુમરસા રાજહંસગમના ।
વૈરાકરસ્મરવિકારાપસંસરણવારાશિમગ્નમનસઃ
શ્રીરાવિરસ્તુ ધુરિ તારાય મે ગુરુભિરારધિતા ભગવતી ॥ ૬॥

શ્રીવાસધૂપકનદાવાસદીપરુચિરાવાસભૂપરિસરા
    શ્રીવાસદેશલસદાવાપકાશરદભાવાભકેશનિકરા ।
શ્રીવાસુદેવરમણી વામદેવવિધિદેવાધિપાવનપરા
    શ્રીવાસવસ્તુનરદેવાહતસ્તુતિસભાવા મુદેऽસ્તુ સુતરામ્ ॥ ૭॥

ભાષાદિદેવકુલયોષામણિસ્તવનઘોષાઞ્ચિતસ્વસવિધા
    દોષાકુલે જગતિ પોષાકુલા સપદિ શેષાહિ શાયિદયિતા ।
દોષાલયસ્ય મમ દોષાનપોહ્ય ગતદોષાભિનન્ધમહિમા
    શેષાશનાહિરિપુશેષાદિસમ્પદ વિશેષાં દદાતુ વિભવાન્ ॥ ૮॥

ઇતિ શ્રીકમલાષ્ટકં સમ્પૂર્ણમ્ ।

સ્તોત્રસમુચ્ચયઃ ૨ (૮૪)

Proofread by Rajesh Thyagarajan

---

*Kamala Ashtakam*

pdf was typeset on May 11, 2023

Please send corrections to *sanskrit@cheerful.com*